[A]चित्रयन्-न्ती, चिचित्रयिषन्-न्ती ; चित्रयिष्यन्-न्ती-ती,

चिचित्रयिषिष्यन्-न्ती-ती ; चित्रयमाणः, चिचित्रयिषमाणः ; चित्रयिष्यमाणः,

चिचित्रयिषिष्यमाणः ; [1]चित्-चित्रौ-चित्रः ; — —

चित्रितम्-तः, चिचित्रयिषितः-तवान्, चित्रः, चिचित्रयिषुः ;

चित्रयितव्यम्, चिचित्रयिषितव्यम् ;

चित्रणीयम्, चिचित्रयिषणीयम् ; चित्र्यम्, चिचित्रयिष्यम् ;

ईषच्चित्रः-दुश्चित्रः-सुचित्रः ; —

चित्र्यमाणः, चिचित्रयिष्यमाणः ; चित्रः, चिचित्रयिषः ;

चित्रयितुम्, चिचित्रयिषितुम् ; चित्रणा, चिचित्रयिषा ;

चित्रणम्, चिचित्रयिषणम् ; चित्रयित्वा, चिचित्रयिषित्वा ;

चित्रम् २, चित्रयित्वा २, } चिचित्रयिषम् २, चिचित्रयिषित्वा २. }

## (526) "चिरि हिंसायाम्"

(V-स्वादिः-1277. सक. सेट्. पर. )

अयं धातुश्छान्दसः । भाषायामपीत्येके ।

द्व्यच्कोऽयं धातुः । इकारः न इत्संज्ञकः । अत एव,

'दरिद्राजागृदीधीङामनेकाच्त्वं चिरेर्जिरेः ।
अदन्तोर्णोतिवेवीङां स्मर्यते णेस्तथोलडेः ॥' इत्यभियुक्तोक्तिः सङ्गच्छते ।

अनेकाच्त्वाद् यङ् न ।

[2]चिरायकः-यिका, चिरायकः-यिका, [3]चिचिरयिषकः-षिका ;

1. रेफस्य 'संयोगान्तस्य—' (8-2-23) इति लोपः ।
2. ण्वुलि परतः, 'अचो ञ्णिति' (7-2-115) इति वृद्धौ, आयादेशः । एवं णमुल्यपि ज्ञेयम् ।
3. धातोरुदात्तत्वेन सन इडागमे, द्वित्वे, अङ्गस्य गुणायादेशयोः सतोः 'चिचिरयिषकः' इति रूपम् । एवं सन्नन्ते सर्वत्र बोद्धयम् ।

A. 'लोके बष्कयतीह चित्रितमहामध्ये स्वयं चित्रयन् दोष्णा खड्गमुदस्य तस्य वटयन् हस्तादगृह्लादमुम् ।' धा. का. 3. 61.